अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [ खण्ड–क (20) + खण्ड–ख (4+4) ] एवं 8 पृष्ठाः सन्ति ।

**Roll No.**
अनुक्रमांक

|   |   |   |   |   |   |   |   |   |   |   |   |
|---|---|---|---|---|---|---|---|---|---|---|---|
|   |   |   |   |   |   |   |   |   |   |   |   |

**Code No. 55/SS/O/S**
कोड नं.

**SET/सेट A**

# SANSKRIT
## संस्कृतम्
## (309)

**Day and Date of Examination**
(परीक्षादिवसः दिनाङ्कश्च) ____________________

**Signature of Invigilators** 1. ____________________
(निरीक्षकहस्ताक्षरद्वयम्)
2. ____________________

**सामान्य अनुदेशाः :**

**1** परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व–अनुक्रमाङ्कम् अवश्यं लिखतु ।

**2** निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम् ।

**3** उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

**4** स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **55/SS/O/S, Set-A** अवश्यमेव लेखनीया ।

# SANSKRIT
## संस्कृतम्
## (309)

**समय : होरात्रयम् ]** **[ पूर्णाङ्काः – 100**

---

**निर्देशाः –** (i) अस्मिन् प्रश्नपत्रे द्वौ खण्डौ स्तः । खण्डः – क (केन्द्रिकः पाठ्यक्रमः), खण्डः – ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः ।

(ii) खण्डः – क अनिवार्यः । अस्मिन् खण्डे 20 प्रश्नाः सन्ति ।

(iii) खण्डः – ख **एकः** एव वैकल्पिकः समाधेयः ।

(iv) खण्डः – क कृते 85 अङ्काः, खण्डः – ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः । अस्य कृते 15 अङ्काः निर्धारिताः ।

---

### खण्डः – क
### (केन्द्रिकः पाठ्यक्रमः)

1 अधोलिखितेषु कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत – 6

(क) परार्थे आत्मोत्सर्गः

(ख) अतिलोभः न कर्त्तव्यः

(ग) राजते खलु कन्याकुमारी

2 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत – 1×4=4

अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा शापफलं निवार्य पितामहः सुधीरम् उवाच, 'ब्रह्मन् न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः । क्षमा हि मूलं सर्वतपसाम् । परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिः । न आत्मदोषं पश्यति' ।

**प्रश्नाः –**

(क) शप्तां सरस्वती दृष्ट्वा कः उवाच ?

(ख) क्षमा केषां मूलम् ?

(ग) कुपिता बुद्धिः कीदृशी ?

(घ) कुपिता बुद्धिः किं न पश्यति ?

3 अधोलिखितानां प्रश्नानाम् उचितमुत्तरं कोष्ठकात् चित्वा लिखत – **1×4=4**

(क) बाणासुरः कस्य पुत्रः आसीत् ? (प्रजापतेः/शिवस्य)

(ख) भरतेन दक्षिणदेशः कस्मैः दत्तः ? (बाणासुराय/कुमार्यै)

(ग) कन्याकुमार्यां कः हतः ? (बाणासुरः/विवेकानन्दः)

(घ) कन्याकुमारी क्षेत्रे कति समुद्राणां संगमः अस्ति ? (चतुर्णाम्/त्रयाणाम्)

4 (क) रेखाङ्कितपदमाश्रित्य प्रश्न निर्माणं कुरुत – **1×2=2**

(i) धमति् न प्रमदितव्यम् ।

(ii) वेदम् अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति ।

(ख) प्रश्नान् उत्तरत – **1×2=2**

(i) कस्मिन् केन्द्रे कल्पनाचावला महोदयायाः नियुक्ति जातः ?

(ii) कस्य उपदेशाः उपासितव्याः ?

5 एतत् कथनं कः कम्प्रति कथयति ? **2**

(क) वत्से सरस्वति विषादं मा गाः ।

(ख) सखि ! संहर रोषम्, असंस्कृतमतयोऽपिमुनयः माननीयाः ।

6 अधोलिखित पद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत – **2+2=4**

(क) यः स्वाध्यायमधीतेऽब्दं द्विधिना नियतः शुचिः ।
तस्य नित्यं क्षरत्येष पयोदधिधृतं मधु ॥

**प्रश्नद्वयम् –**

(i) अत्र 'एषः' कस्मै प्रयुक्तः ?

(ii) तस्मै किं किं क्षरति ?

(ख) कश्चिदेव हिते भर्तुद्दश्यते न परात्मनः ।
कार्यपेक्षाः हि वर्तन्ते भावस्निग्धाः सुदुर्लभाः ॥

**प्रश्नद्वयम् –**

(i) भर्तुः हिते कः दृश्यते ?

(ii) कीदृशाः जनाः सुदुर्लभाः ?

**7** अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत – **2**

(क) अन्यथा ह्यषिताः पूर्व परद्रव्यामिहारिणः ।

अशक्ताः किंचिदादातुं द्रव्यं गोमायुयन्त्रिताः ॥

अन्वयः –

पूर्वम् अन्यथा हि ________ परद्रव्यामिहारिणः, गोमायुयन्त्रिताः किंचित् द्रव्यम् ________ अशक्ताः ।

(ख) नित्यंरथेन गच्छामि, अश्वाः वहन्ति मे रथम् ।

सम्राटऽस्मि नरोनास्मि, नासुरोऽस्मि निशाचरः ॥

अन्वयः –

नित्यम् रथेन गच्छामि, अश्वाः मे रथम् वहन्ति, सम्राट् ________ नरः न अस्मि, ________ अस्मि, निशाचरः न ।

**8** अधोलिखित पद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत – **2**

(क) निद्रालाभः सुखं च स्यात् मूर्ध्नि तैलनिषेवणात् ।

भावार्थः –

शिरसि तैलाभ्यंगेन सुखपूर्वकं ________ भवति ।

(ख) जपेत् सत्येन चानृतम् ।

भावार्थः –

असत्यं सत्येन ________ ।

**9** पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत – **2**

| स्तम्भ–'अ' | स्तम्भ–'ब' |
|---|---|
| (i) को वर्धते | (क) यत् सुख शान्तचेतसाम् |
| (ii) सन्तोषामृततप्तानां | (ख) ब्रूतेश्चानृतं शश्वत् |
| (iii) को न प्रत्येतकः | (ग) विनीतः |
| (iv) तस्य नित्यं क्षरत्येतत् | (घ) पयोदधिधृतं मधु |

**10** 'हृदयपरिवर्तनम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत । **6**

सहायतायै बिन्दवः दत्ताः –

**बिन्दवः**

यक्षाः, पंच, ब्राह्मणवेश धारिणः, राज्ये, मैत्रबलराज्ञः, वने, वादितं, विचरन्ति ते गोपालकेन, बंशीध्वनिं, श्रृण्वन्ति, बंशीवादकः गवां समीपे, सर्वे आसीत्, अग्रे गच्छन्, गोपालकः कथयति, राजा, तेषां, बोधिसत्त्वराज्ये निर्मीभावं, कथयति, तेषा, राजा, इच्छानुरूपं, मांसरुधिरभोजनं यच्छति, सर्वे हिंसां त्यज्यन्ति ।

**11** अधोलिखितं नाट्यांशद्वयं पठित्वा प्रश्नान् उत्तरत –

(क) व्यापारी – महाराज, एकः जीर्णकस्मधारी एतत फलं विक्रीणाति स्म । **1+1=2**
बहुमूल्यम् अद्भुतम् इति च मत्वा तस्मै वस्ययुगलं दत्त्वा अत्र आनीतवान् ।

राजा – प्रीतोऽस्मि भवतः राजमक्त्या मंत्रिन् । एनं यथोचितं सत्कृत्य प्रेषयतु । तं लब्धदत्तं च पुनः अह्वयतु ।

मन्त्री – यथा आदिशति भवान् ।

राजा – (स्वगतम्) कथं मूर्खः स लब्धदत्तः न अभिजानातिफलस्य दिव्यताम् । (व्यापारी गच्छति, लब्धदत्तः पुनः प्रविशति)

लब्धदत्तः – जयतु महाराजः पश्यतु भगवत् । भवतां कृपया अद्य नूतनं कस्ययुगलं धारयामि । महान् आनन्दः वर्तते ।

राजा – भवान् अल्पसन्तुष्टः लोभरहितः इति दृष्ट्वा प्रसन्नः अस्मि । पुनः एतत् फलं स्वीकरोतु । भवतः सर्वे मनोरथाः पूर्णाः भविष्यन्ति ।

प्रश्नाः

(i) व्यापारी किं दत्त्वा फलम् आनीतवान् ?

(ii) लब्धदत्तस्य का विशेषता आसीत् ?

(ख) संविद्यमानं नास्तीति ब्रूयादस्मद्विधः कथम् । **1×2=2**
न दास्यामीत्यसत्यं वा विस्पष्टमपि याचितः ॥

प्रश्नाः

(i) 'अस्मद्विधः' इति शब्दः राज्ञः कं गुणं प्रकटयति ?

(ii) याचितः सन् दानशीलः नरः किं करोति ?

**12** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त प्रश्नान् उत्तरत –

(क) गद्यांशः

अस्मिन् संसारे माता मातृभूमिः च सर्वोत्तमे । मातुः यादृशं नैसिर्गिकं प्रेम स्वपुत्रे भवति यतादृशं क्वापि अन्यत्र । स्वपुत्रस्य कृते माता सर्वस्वम् अपि त्यक्तुं शक्नोति । मानवः यस्यां जन्म लभते, सा तस्य जन्मभूमिः । स्वजन्म–भूमिः सर्वदा आद्रियते । देशस्य उन्नत्यै देशभक्ति–भावनायाः महती आवश्यकता भवति ।

**प्रश्नाः –**

(i) अस्य गद्यांशस्य शीर्षकं लिखत । **1**

(ii) जन्मभूमिः का ? **2**

(iii) देशस्य उन्नत्यै कस्याः आवश्यकता भवति ? **2**

(ख) पद्यांशः

वनेऽपि सिंहा मृगमांसभक्षाः बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनामिभूताः न नीतिमार्गं परिलंघयन्ति ॥

**प्रश्नाः –**

(i) अस्य पद्यांशस्य शीर्षकं लिखत । **1**

(ii) नीतिमार्गं केन परिलङ्घयन्ति ? **2**

(iii) सिंहाः किम्भक्षाः ? **2**

13 मञ्जूषापदसहायतया 'दीपावलीः' इति विषयमधिकृत्य दशवाक्यानि लिखत – 1×10=10

| मञ्जूषा |
| --- |
| दीपावलीः, पर्वस्य, अस्मिन्, पर्वेजनाः गृहे, विस्फोटकाः, मिष्टान्नानि, लक्ष्म्याः, मन्दिरेषु, अवन्तिः लेपनं मर्जनं वा, कार्तिक मासे, साजसज्जां, कुर्वन्ति, हिन्दूनां, धार्मिकः अस्ति, प्रकाशस्य, पवित्रतायाः, इमम्, सर्वे जना, मानयन्ति, आनन्देन, दृश्यन्ते । |

14 भवान् सौरभः । भवताम् उपनगरे पत्रालयः नास्ति । तदर्थं महापत्रालयपालकं प्रति पत्र लिखत । 6

15 भवतः नाम बालेन्दुः । श्वः भवतः जन्मोत्सवः अस्ति । अतः तमुपलक्ष्य स्वमित्राय देवेशाय दूरभाष संवादं लिखत । चत्वारिवाक्यानि लिखत । 1×4=4

16 रेखांकितपदे संधिच्छेदं कुरुत – 1

(क) अस्त्युरस्यां दिशि देवतात्मा ।

(ख) श्रृङ्गाणि यस्यातपवन्ति सिद्धाः ।

17 रेखांकितपदे का विभक्तिः किं च मूलपदम् ?

(क) बाणासुरः कस्य पुत्रः आसीत् ? 2

(ख) सः जनान् अरक्षत् । 2

18 समुचितपदं निमार्णं कृत्वा रिक्तस्थानं पूरयत – 1×4=4

(क) स ________ तैलनिषेवणात् निद्रांलभते । (शिरस् + उचित विभक्ति)

(ख) ________ अशान्तिः बहुरोगान् जनयति । (मनस् + उचित विभक्ति)

(ग) कृष्णः ________ दुष्टं कसं हतवान् । (बाल्यकाल + उचित विभक्ति)

(घ) किराताः छायां ________ गच्छन्ति । (नि + सेन् + ल्यप्)

19 यथानिर्दिष्टं कुरुत – 1×4=4

(क) धनोपार्जनाय देशान्तरं प्रस्थिताः । (रेखांकितपदस्य विग्रहं कुरुत)

(ख) यथा ते तत्र वर्तेरन् तथा तेषु वर्तेथाः । (एकम् अव्ययंचिनुत)

(ग) एष महाराजः तिष्ठति । (रेखांकित पदस्य विग्रहं कुरुत)

(घ) यस्य वाङ्मनसी शुद्धे । (रेखांकित पदस्य विग्रहं कुरुत)

20 अधोलिखितवाक्ये एकम् अव्ययम् एकम् उपसर्गं च चित्वा लिखत – 2

(क) भवन्तः कुत्र गच्छन्ति ?

(ख) पर्यावरणस्य संरक्षणं करणीयम् ।

## खण्डः – ख

## वैकल्पिक – I
## (संस्कृतं संस्कृतिश्च)

**21** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत – **2**

| 'अ' | 'ब' |
|---|---|
| (i) इंदिरागांधी चरितम् | (क) डॉ. रमाकान्त शुक्लः |
| (ii) श्री भार्गवराघवीयम् | (ख) डॉ. राजेन्द्र मिश्र |
| (iii) भारत शतकम् | (ग) सत्यव्रत शास्त्री |
| (iv) भाति मे भारतम् | (घ) रामभद्राचार्य |

**22** (क) अधोलिखितसंख्यानां कृते संस्कृत पदानि लिखत – **2**

$10^3$, $10^6$, $10^8$, $10^{50}$

(ख) शून्यस्य अवधारणा सर्वप्रथमं कुत्र प्राप्यते ? तस्य संकेतः कस्मिन् ग्रंथे प्राप्यते ? **2**

(ग) कृषिशास्त्रस्य विश्वकोशः कः ग्रंथः कथ्यते ? तस्य ग्रंथस्य रचयिता कः अस्ति ? **2**

(घ) 'गणितसारसंग्रहः' इति ग्रन्थः केन लिखितः ? **1**

**23** अशोकस्य शिलालेखेषु कस्याः भाषायाः उपयोगः उपलभ्यते ? अस्या भाषायाः प्रयोगः कस्य महाकवेः नाटकेषु प्राप्यते ? **1+1=2**

**24** (क) ब्रह्मचर्याश्रमानन्तरं युवा कस्मिन् आश्रमे प्रविशति ? तत्र प्रवेष्टुं कः संस्कारः क्रियते ? **2**

(ख) संस्काराः कति संख्याकाः भवन्ति ? **1**

(ग) कर्णवेधः इति संस्कारः कदा क्रियते ? **1**

## वैकल्पिक – II

## (प्रयोजनमूलक संस्कृतम्)

**21** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – **1×4=4**

(क) ब्रह्मगुप्तः ________ नियमान् निर्मितवान् ।

(ख) ________ वृत्त, त्रिभुज–चतुर्मजानां सिद्धप्रकारं वर्णतवान् ।

(ग) ________ वैदिक शब्द कोषः अस्ति ।

(घ) संस्कृते प्रसारणे श्रव्यं दृश्यं चानुभवामः ________ ।

**22** अधोलिखितान् प्रश्नान् उत्तरत – **1×4=4**

(क) वर्तमानकाले दूरदर्शने प्रतिदिनं कस्मिन समये संस्कृत वार्ता प्रसारणं भवति ?

(ख) दूरदर्शने सर्वप्रथमं प्रस्तुतस्य संस्कृत नाटकस्य किं नाम ?

(ग) आकाशवाणी भवने वार्ताकक्षे सम्पादकाः किं कुर्वन्ति ?

(घ) संचारमाध्यमः कः कथ्यते ?

**23** पाक्षिकी पत्रिका का भवति ? एकस्याः पाक्षिक पत्रिकायाः नामोल्लेखं कुरुत । **2**

**24** (क) पत्रिकायाः भाषा कीदृशी भवेत् ? **1**

(ख) शोधपत्रिकाः केषां कृते उपयोगि ग्रन्थः भवन्ति ? **1**

(ग) 'नवप्रभातम्' इति दैनिकसमाचारपत्रं कुतः प्रकाश्यते ? **1**

(घ) त्रुटिशोधने प्रयुक्तम् अधोलिखित चिह्नद्वयं अभिप्रायेण सह मेलयत – **2**

| (अ) | (ब) |
|---|---|
| (क) ( – ) | (i) विवरण चिह्नम् |
| (ख) ( : ) | (ii) योजक चिह्नम् |